# Shivarchakaproktam Mrillingamahimopadesham

# શિવાર્ચકપ્રોક્તં મૃલ્લિઙ્ગમહિમોપદેશમ્

## Document Information

Text title : Shivarchakaproktam Mrillingamahimopadesham 3

File name : shivArchakaproktaMmRRillingamahimopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 696-706||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# શિવાર્ચકપ્રોક્તં મૃલ્લિઙ્ગમહિમોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શિવાર્ચકઃ (આહ) -
રાજન્ તદ્દોષશાન્ત્યર્થં કુરુમૃલ્લિઙ્ગપૂજનમ્ ।
સદા કરોતુ યત્નેન ભવત્યા મૃલ્લિઙ્ગપૂજનમ્ ॥ ૬૯૬॥

ક્ષણં મૃન્મયલિઙ્ગાનાં યદિ કુર્યાત્સ પૂજનમ્ ।
તદા સ સર્વરોગેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૬૯૭॥

કિમૌષધૈર્જપૈર્હોમૈઃ કિં દાનૈઃ કિં ગ્રહાર્ચનૈઃ ।
કિમન્યૈરપ્યુપાયૈશ્ચ વિનામૃત્યુઞ્જયાર્ચનમ્ ॥ ૬૯૮॥

સદ્યઃ સિધ્યન્ત્યભીષ્ટાનાં(નિ) કૃતે મૃત્યુઞ્જયાર્ચને ।
મૃત્યુઞ્જયાર્ચનાઽસાધ્યં ન કિઞ્ચિદપિ ભૂપતે ॥ ૬૯૯॥

મૃત્યું તરન્તિ તે મર્ત્યા યે મૃત્યુઞ્જયપૂજકાઃ ।
મર્ત્યા મૃત્યુવશં યાન્તિ ત્યક્તમૃત્યુઞ્જયાર્ચનાઃ ॥ ૭૦૦॥

મૃત્યુઞ્જયમનભ્ય યો મૃત્યું તર્તુમિચ્છતિ ।
સ મૂર્ખ ઇતિ વિજ્ઞેયઃ સત્યં સત્યં ન સંશયઃ ॥ ૭૦૧॥

દીર્ઘાયુષો ભવિષ્યન્તિ કૃતમૃત્યુઞ્જયાર્ચનાઃ ।
અલ્પાયુષો ભવિષ્યન્તિ ત્યક્તમૃત્યુઞ્જયાર્ચનાઃ ॥ ૭૦૨॥

મૃત્યુઞ્જયાર્ચનં કાર્યં મૃલ્લિઙ્ગે સર્વકામદે ।
તત્ર સમ્પૂજિતઃ શમ્ભુઃ પ્રસીદતિ ન સંશયઃ ॥ ૭૦૩॥

રાજન્નાયુષ(ષ્ય)મારોગ્યમૈશ્વર્યમતુલં બલમ્ ।
જ્ઞાન નિર્વાણમપ્યન્તે પ્રાપ્યં મૃલ્લિઙ્ગપૂજયા ॥ ૭૦૪॥

મૃલ્લિઙ્ગપૂજનં કૃત્વા વિધિવદ્ભક્તિપૂર્વકમ્ ।
ભુક્ત્વા ભોગાન્યથાકામં શિવં યાન્તિ ચ ભૂપતે ॥ ૭૦૫॥

મૃલ્લિઙ્ગાર્ચનમાત્રેણ સોમઃ સોમાર્ધશેખરઃ ।
સન્તુષ્ટઃ સકલાભીષ્ટાન્દાસ્યત્યેવ ધ્રુવં ધ્રુવમ્ ॥ ૭૦૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાપ્રતિ શિવાર્ચકપ્રોક્તં મૃલ્લિઙ્ગમહિમોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૬૯૬-૭૦૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 696-706..

Notes:
A Śivārcaka શિવાર્ચક delivers Upadeśa ઉપદેશ (to Rājā રાજા) about the merits of worshiping Mṛtyuñjaya Śiva મૃત્યુઞ્જય શિવ, especially through the form of Mṛnmayaliṅga/Mṛlliṅga મૃન્મયલિઙ્ગ/મૃલ્લિઙ્ગ.

Proofread by Ruma Dewan

*Shivarchakaproktam Mrillingamahimopadesham*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*